# Shri Lakshminrisimha Manglashasanam

# શ્રીલક્ષ્મીનૃસિંહ મઙ્ગલાશાસનમ્

## Document Information

Text title : Laxmi Nrisimha Mangalashasanam

File name : lakShmInRRisiMhamanglAshAsanam.itx

Category : vishhnu, dashAvatAra, mangala, vishnu

Location : doc_vishhnu

Transliterated by : Ganesh Kandu kanduganesh at gmail.com

Proofread by : Ganesh Kandu, NA, PSA Easwaran

Description/comments : shodhagangA thesis about Nrisimha cult Appendix 1

Latest update : July 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનૃસિંહ મઙ્ગલાશાસનમ્

શ્રીપરાઙ્કુશયોગીન્દ્રશઠારિપ્રમુખાન્ ગુરૂન્ ।
મઙ્ગલાશાસનપરાન્ મહિતાનનિશં ભજે ॥ ૧॥

જગજ્જન્માદિલીલાય જગદાનન્દહેતવે ।
જગચ્ચક્ષુર્નિવાસાય શ્રીનૃસિંહાય મઙ્ગલમ્ ॥ ૨॥

હિરણ્યસ્તમ્ભસમ્ભૂતિપ્રખ્યાતપરમાત્મને ।
પ્રહ્લાદાર્તિમુષે જ્વાલાનરસિંહાય મઙ્ગલમ્ ॥ ૩॥

ગરુડાદ્રિગુહાગેહે ગજકુણ્ડસરસ્તટે ।
હિરણ્યસ્થાણવહઙ્કારહારિસિંહાય મઙ્ગલમ્ ॥ ૪॥

વારિજાવારિતભયૈર્વાણીપતિમુખૈસ્સુરૈઃ ।
મહિતાય મહોદારમાલોલાયાસ્તુમઙ્ગલમ્ ॥ ૫॥

વરાહકુણ્ડે મેદિન્યૈ પારાહર્થપ્રદાયિને ।
દન્તલગ્નહિરણ્યાક્ષદંષ્ટ્રસિંહાય મઙ્ગલમ્ ॥ ૬॥

ગોભૂહિરણ્યનિર્વિણ્ણગોખિલજ્ઞાનદાયિને ।
પ્રભઞ્જન શુનાસીર કારઞ્જાયાસ્તુ મઙ્ગલમ્ ॥ ૭॥

ભાર્ગવાખ્યતપસ્વીશભાવનાભાવિતાત્મને ।
અક્ષય્યતીર્થતીરસ્થભાર્ગવાયાસ્તુ મઙ્ગલમ્ ॥ ૮॥

ચતુરાનનચેતોઽબ્જચિત્રભાનુસ્વરૂપિણે ।
વેદાદ્રિગહ્વરસ્થાય યોગાનન્દાય મઙ્ગલમ્ ॥ ૯॥

હાહાહુહ્વાખ્યગન્ધર્વનૃત્તગીતહૃતાત્મને ।
ભવહન્તૃતટચ્છત્રવટસિંહાય મઙ્ગલમ્ ॥ ૧૦॥

ભારદ્વાજમહાયોગિમહાપાતકહારિણે ।
તાપનીયરહસ્યાર્થપાવનાયાસ્તુ મઙ્ગલમ્ ॥ ૧૧॥

શ્રીશઠારિયતીન્દ્રાદિયોગિહૃત્પદ્મભાનવે ।
સર્વત્ર પરિપૂર્ણાયાહોબિલેશાય મઙ્ગલમ્ ॥ ૧૨॥

મઙ્ગલાશાસનમિદં માનિવાસમુનીરિતમ્ ।
મહનીયં પઠન્ શ‍ૃણ્વન્ મઙ્ગલાયતસમ્ભવેત્ ॥ ૧૩॥

ઇતિ શ્રીલક્ષ્મીનૃસિંહ મઙ્ગલાશાસનં સમ્પૂર્ણમ્ ।

Encoded by Ganesh Kandu kanduganesh at gmail.com

Proofread by Ganesh Kandu, PSA Easwaran

---

*Shri Lakshminrisimha Manglashasanam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*